शक्तोऽस्य मन्युर्भवता विनेतुमिति रघुः। रजः-परिणामभेदो न शक्यते प्रत्याख्यातुमिति तत्त्वकौमुद्यां वाचस्पतिमिश्रः। शक्या मखेनापि मुदोऽमराणामिति नैषधम्। इति दुर्गादासः॥

शक, ष ञ शक्तौ। इति कविकल्पद्रुमः॥ (दिवा० उभ०-सक०-सेट्।) शक्तिर्दिवादिपक्षे क्षमा स्वादिपक्षे सामर्थ्यम्। ष ञ, शक्यति शक्यते दुःखं दीनः। इति दुर्गादासः।

शकः, पुं, (शक+अच्।) जातिभेदः। नृपभेदः। इति मेदिनी॥ स च नृपः शकादित्यः इति शालिवाहन इति च नाम्ना ख्यातः। तस्य मरणदिनावधि वत्सरगणनाङ्कः शकाब्देति नाम्ना पञ्जिकायां लिख्यते। स च म्लेच्छजातिविशेषः। सत्ययुगे सगरराजेनास्य मस्तकार्द्धं मुण्डयित्वा वेदबाह्यत्वमकारि। यथा,—

"ततः शकान् सयवनान् काम्बोजान् पारदांस्तथा।
पह्लवांश्चापि निःशेषान् कर्त्तुं व्यवसितो नृपः॥
ते हन्यमाना वीरेण सगरेण महौजसा।
वशिष्ठं शरणं जग्मुः सूर्य्यवंशपुरोहितम्॥
वशिष्ठः शरणापन्नान् समये स्थाप्य तान्नृषिः।
सगरं वारयामास तेभ्यो दत्त्वाभयं तदा॥
सगरस्तां प्रतिज्ञान्तु निशम्य सुमहाबलः।
धर्म्मं जघान तेषाञ्च वेशानन्यांश्चकार ह॥
अर्द्धं शिरः शकानान्तु मुण्डयामास भूपतिः।
जवनानां शिरः सर्व्वं काम्बोजानामपि द्विज॥
पारदाम्मुक्तकेशांस्तु पह्लवान् श्मश्रुधारिणः।
निःस्वाध्यायवषट्कारान् सर्व्वानेव चकार ह॥"

इति पाद्मे स्वर्गखण्डे सगरोपाख्यानम् १५ अः॥ देशभेदः। इति विश्वः॥ (यथा, मात्स्ये। १२०।४५।

"तुषारान् सर्व्वरान् कारान् पह्लवान् पारदान् शकान्।
एतान् जनपदान् मह्यु प्लावयित्वोदधिं गता॥")

शकटः, पुं, क्ली, (शक्नोति भारं वोढुमिति। शक्+"शकादिभ्योऽटन्।"उणा० ४।८१। इति अटन्।) यानविशेषः। गाड़ी इति भाषा॥ तत्पर्य्यायः। अनः २। इत्यमरः॥ अक्षः ३। इति शब्दरत्नावली॥ विष्णुवध्यासुरविशेषः। द्विसहस्रपलपरिमाणम्। तत्पर्य्यायः। भारः २ आचितः ३ शाकटीनः ४ शलाटः ५। इति हेमचन्द्रः॥ उक्तञ्च।

"शकटः शाकिनी गावो यानमस्कन्दनं वनम्।
अनूपः पर्व्वतो राजा दुर्भिक्षे नव वृत्तयः॥"
इति भरतः॥

तिनिसवृक्षः। इति राजनिर्घण्टः॥ (व्यूहविशेषः। यथा, मनुः। ७।१८७।

"दण्डव्यूहेन तन्मार्गं यायात्तु शकटेन वा॥"

शकटाकृतित्वात् रोहिणीनक्षत्रम्। यथा, बृहत्संहितायाम्। २४।३०।

"रोहिणीशकटमध्यसंस्थिते
चन्द्रमस्यशरणीकृता जनाः।
क्वापि यान्ति शिशुयाचिताशनाः
सूर्य्यतप्तपिठराम्बुपायिनः॥")

शकटहा, [न्] पुं, (शकटं हन्तीति। हन्+क्विप्।) श्रीकृष्णः। इति हेमचन्द्रः॥ (एतद्विवरणं भागवते १० स्कन्धे ७ अध्याये तथा हरिवंशे ६१ अध्याये च द्रष्टव्यम॥) शकटनाशके, त्रि॥

शकटाह्वा, स्त्री, (शकटमिति आह्वा यस्याः।) रोहिणीनक्षत्रम्। तस्याः पञ्चतारामयशकटाकृतित्वात्॥

शकलं, क्ली, (शक्नोतीति। शक्+"शकिशम्योर्नित्।" उणा० १।१११। इति कलः।) त्वक्। खण्डम्। (यथा, रघुः। २।४६।

"अथान्धकारं गिरिगह्वराणां
दंष्ट्रामयूखैः शकलानि कुर्व्वन्॥")

रागवस्तु। वल्कलम्। इति मेदिनी॥ शल्कम्। आंश इति भाषा। इति शकलिन्शब्ददर्शनात्॥

शकलः, पुं, क्ली, (शक्+कलः।) एकदेशः। (यथा, मनुः। ६।८८।

"प्रतिगृह्य पुटेनैव पाणिना शकलेन वा॥")

खण्डम्। यथा,—

"भित्तं शकलखण्डे वा पुंस्यर्द्धोऽर्द्धं समेऽंशके॥"
इत्यमरः॥

(यथा, मनुः। १।१३।

"ताभ्यां स शकलाभ्याञ्च दिवं भूमिञ्च निर्म्ममे॥")

शकली, [न्] पुं, (शकलमस्यास्तीति। इनिः।) मत्स्यः। इत्यमरः॥

शकान्तकः, पुं, (शकस्य म्लेच्छजातिविशेषस्य अन्तकः।) विक्रमादित्यराजः। इति केचित्॥

शकारः, पुं, राज्ञः अनूढायाः स्त्रिया भ्राता। यथा, साहित्यदर्पणे ३ परिच्छेदे॥

"मदमूर्खताभिमानी दुष्कुलतैश्वर्य्यसंयुक्तः।
सोऽयमनूढाभ्राता राज्ञः श्यालः शकार इत्युक्तः॥"

शकारिः, पुं, (शकस्य म्लेच्छजातिविशेषस्यारिः शत्रुः।) विक्रमादित्यराजः। स तु उज्जयनीदेशाधिपतिः। यथा,—

"साहसाङ्कः शकारिः स्याद्विक्रमादित्य इत्यपि॥"
इति जटाधरः॥

शकुनं, क्ली, (शक्नोति शुभाशुभं विज्ञातुमनेनेति। शक्+"शकेरुनोन्तोन्त्युनयः।"उणा० ३।४९। इति उनः।) शुभशंसिनिमित्तम्। इति मेदिनी॥ सगुन इति हिन्दीभाषा। फललक्षणम्। इत्यजयपालः॥ * ॥ अथ शुभशकुनानि।

"कीर्त्तनात् श्रवणतो विलोकनात्
स्पर्शनात् समधिकं समोत्तरम्।
मङ्गलाय दधिचन्दनादिकं
स्यात् प्रवासभवनप्रवेशयोः॥
दध्याज्यदूर्व्वाक्षतपूर्णकुम्भाः
सिद्धान्नसिद्धार्थकचन्दनानि।
आदर्शशङ्खामिषमीनमृत्ला-
गोरोचनागोमयगोमधूलिः॥
गौर्व्वाणवीणाफलभद्रपीठ-
पुष्पाञ्जनालङ्करणायुधानि।
ताम्बूलयानासनवर्द्धमान-
ध्वजातपत्रव्यजनाम्बराणि॥
अम्भोजभृङ्गारसमृद्धवह्नि-
गजाजवाहाः कुशचामराणि।
रत्नानि चामीकररूप्यताम्र-
बद्धेडकाश्चौषधयः सुराश्च॥
वनस्पतेर्नूतनशाकमिव
माङ्गल्यपञ्चाशदिदं प्रदिष्टम्।
शुभेषु कार्य्येष्वशुभेषु चैव
कार्य्यं गतानां शुभदाः सदैव॥
एतानि दृष्ट्वा शुभदर्शनानि
कुर्व्वन्ति दृष्टः पथि दक्षिणेन।
सन्नृहिलोकादशुभावहानि
त्यक्तानि वामेन शुभा भवन्ति॥
गान्धारषड्जर्षभस्तथान्ये
स्वरेषु गम्भीरमनोरमा ये।
वादित्रवेदध्वनिगीतनृत्य-
मित्यादिशस्तं किल यत्र रौद्रम्॥
आदाय रिक्तं कलसं जलार्थी
यदि व्रजेत् कोऽपि सहाध्वगेन।
पूर्णं समादाय निवर्त्ततेऽसौ
यथा कृतार्थः पथिकस्तथैव॥ * ॥
अङ्गारभस्मेन्धनरज्जुपङ्क-
पिण्याककार्पासतुषास्थिविष्ठाः।
कृष्णायसावस्करकृष्णधान्य-
पाषाणकेशा भुजगौषधानि॥
तैलं गुड़ं चर्म्म वसा विभिन्नं
रिक्तञ्च भाण्डं लवणं तृणञ्च।
तक्रार्गला शृङ्खलहस्तिवाताः
कार्य्ये क्वचित् त्रिंशदिमे न शस्ताः॥ * ॥
स्वपादयानस्खलनं नृपाणां
भङ्गः क्वचिद्यानपलायनञ्च।
द्वाराभिघाताध्वगशस्त्रपाताः
प्रस्थानविघ्नं कथयन्तु यातुः।
मार्ज्जारयुद्धारवदर्शनानि
कलिः कुटुम्बस्य परस्परञ्च।
चित्तस्य कालुष्यकरञ्च सर्व्वं
गन्तुः प्रयाणप्रतिषेधनाय॥
दृष्टे शवे रोदनशब्दहीने
महार्थसिद्धिः कथितोद्यमेषु॥
गृहप्रवेशेषु शवः शवर्त्तं
रुजं सदीर्घामथवा ददाति॥
गण्डूषमावर्जयतां नराणा-
मन्तर्गलं चेत् प्रविशत्यकस्मात्।
भवेत् तदाभीप्सितसौख्यलाभो
यः कौतुकी तेन निरूप्यमेतत्॥
उज्झितं झटिति दन्तधावनं
संमुखं पतति यत्र वासरे।
भोजनं भवति तत्र वीप्सितं
व्यासभाषितमिदं हि नान्यतम्॥"